International Journal of Sanskrit Research 2020; 6(1): 129-132

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 129-132
© 2020 IJSR
www.anantaajournal.com
Received: 12-11-2019
Accepted: 16-12-2019

**Dr. Chandrakala R Kondi**
Assistant Professor, Rashtriya Sanskrit Sansthan Deemed to be University, Rajiv Gandhi Campus, Sringeri. Chikkamagaluru, Karnataka, India

**Corresponding Author:**
**Dr. Chandrakala R Kondi**
Assistant Professor, Rashtriya Sanskrit Sansthan Deemed to be University, Rajiv Gandhi Campus, Sringeri. Chikkamagaluru, Karnataka, India

# जगन्नाथमते भावध्वनिः

**Dr. Chandrakala R Kondi**

**प्रस्तावना**

यद्यपि काव्यात्मभूतो रस इत्युच्यते तथापि ‘रस’ शब्देन भावादयोऽपि गृह्यन्त इति रसस्वरूपमिव भावादीनामपि स्वरूपं निरूपितमस्ति आलङ्कारिकैः। तथैव पण्डितराजोऽपि रसगङ्गाधरे रसस्वरूपनिरूपणानन्तरं भावलक्षणं निरूपितवान्। तन्मते भावध्वनेः निरूपणात् प्राक् तस्याभिप्राये भावानां स्वरूपं किमिति ज्ञातव्यं भवति। यतः तस्मिन् सन्दर्भेऽपि तेन भावध्वनिसम्बद्धा विषयाः उक्ताः सन्ति। तेन दत्तं भावलक्षणं “ वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावाः” [1] इत्याकारकभरतकृतभावलक्षणमिव न भावसामान्यलक्षणम्, अपि तु मम्मटादीनामिव शास्त्रीयं वर्तते।

स्वसम्मतभावलक्षणनिरूपणात् प्राक् जगन्नाथः पूर्वपक्षरूपेण,

1. विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वम्।
2. विभावानुभावभिन्नत्वे सति साक्षात् द्वारान्तरनिरपेक्षतया रसव्यञ्जकत्वम्
3. विभावानुभावभिन्नत्वे सति शब्दभिन्नत्वे सति रसाभिव्यञ्जकत्वम्
4. रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वम् [2]

इत्येतानि भावलक्षणानि प्रस्तूय युक्तियुक्तं च खण्डयित्वा स्वकीयं भावलक्षणमेवं प्रस्तौति-

**विभावादिव्यज्यमान-हर्षाद्यन्यतमत्वं भावत्वम्।**

इति। विभावादिभिर्व्यज्यमानत्वे सति हर्षादिचतुर्विंशत्यन्यतमत्वमेव भावत्वम्। प्राधान्येन व्यज्यमानस्य भावस्य ग्रहणे भावध्वनौ, अप्राधान्येन व्यज्यमानस्य च ग्रहणे गुणीभूतव्यङ्ग्यभावे च इदं भावलक्षणं समन्वेति। रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वमित्यस्मिन् चतुर्थ(पूर्वपक्षीय)भावलक्षणे व्यञ्जना व्यञ्जकविशेषणतया उपात्ता। तेन वाच्य-लक्ष्य-व्यङ्ग्यानां सर्वेषामप्यर्थानां व्यञ्जकत्वमङ्गीकृतत्वात् मम्मटाचार्येण [3] क्वचिद्वाच्यार्थस्यापि व्यञ्जकत्वं सम्भवतीति वाच्यस्यापि हालाहलसदृशत्वप्रकारकज्ञानस्य रसाभिव्यञ्जकतया रसाभिव्यञ्जकचर्वणाविषये हालाहलसदृशत्वप्रकारकज्ञाने तल्लक्षणमतिव्याप्तं भवति। परन्त्वस्मिन् सिद्धान्तलक्षणे व्यज्यमानहर्षाद्यन्यतमत्वविशेषणं भावत्वेन परिगणितचित्तवृत्तिविशेषणत्वेनैव निविष्टम्। तेन हालाहलसदृशत्वप्रकारकज्ञानस्य चित्तवृत्तित्वेपि व्यङ्ग्यत्वं नास्तीति, परिगणितचित्तवृत्तावनन्तर्भावाच्च नातिप्रसङ्गः। भावलक्षणकरणे जगन्नाथः मम्मटाचार्यमेवानुसृतवान्। हर्षादयस्तु हर्ष-स्मृति-क्रीडा-मोह-

धृति-शङ्का-ग्लानि-दैन्य-चिन्ता-मद-श्रम-गर्व-निद्रा-मति-व्याधि-त्रास-सुप्त-विबोध-अमर्ष-अवहित्था-उग्रता-उन्माद-मरण-वितर्क-विषाद- औत्सुक्य-आवेग-जडता-आलस्य-असूया-अपस्मार-चपलताः, प्रतिपक्षकृतधिक्कारादिजन्यनिर्वेदश्चेति त्रयस्त्रिंशद्व्यभिचारिणः। गुरु-देव-नृप-पुत्रादिविषया रतिश्चेति चतुस्त्रिंशत्। विभावादिव्यज्यमानत्वानिवेशे स्वशब्दवाच्यहर्षादिष्वतिव्याप्तिः, तेष्वपि हर्षाद्यन्यतमत्वसत्त्वात्। हर्षाद्यन्य-तमत्वानिवेशे रसादिष्वतिव्याप्तिः, तेषु विभावादिव्यज्यमानत्वस्य सत्त्वात्।

एवं व्यभिचार्यञ्जितो भाव [4] इति प्राचीनोक्तिरपि जगन्नाथस्य भावलक्षणं समर्थयति। अभिव्यक्तिविषयीभूतो व्यभिचारी हर्षादिः भाव इति कथ्यत इति निष्कर्षः। भावविषये जगन्नाथस्याभिप्रायमेवं वक्तुं शक्यते-

1. अस्मिन् लक्षणे भावपदेन केवलं व्यभिचार्येव गृह्यते न स्थायी, न वा सात्त्विकभावः।
2. व्यज्यमानः भावः भावनाद्वारैव कमपि रसमभिव्यञ्जयति-भावस्यापि भावनाद्वारेणैव व्यञ्जकत्वात्।
3. सर्वे भावाः चित्तवृत्तिरूपाः।
4. ज्ञानमपि चित्तवृत्तिरूपमेव। अतः भ्रमोऽपि चित्तवृत्तेरेव प्रकारो भवति।
5. अनुभावो नाम केवलं बाह्यचेष्टा न, परन्तु भावानुभूतेः फलस्वरूपम्, अर्थात् कार्यरूपेण वर्तमानः समस्तोऽपि प्रतिक्रियात्मको विकारोऽनुभाव इत्युच्यते।

**भावस्वरूपनिरूपणे पण्डितराजस्य काश्चिदसाधारण्यः विशेषताः वर्तन्ते, या अन्यत्र दुर्लभाः।**

1. भावस्य चित्तवृत्तित्वपक्षमनेन सुव्यवस्थापितम्। एतत्तु परिगणनीयः कश्चन विशेषः पण्डितराजस्य। केषाञ्चनभावानां लक्षणेष्वेव चित्तवृत्तिपदं तेन अन्तर्भावितम्। केषाञ्चन लक्षणे तादृशपदाभावेऽपि तल्लक्षणस्य समन्वयस्तु भवत्येव।
2. सर्वत्रापि अस्पष्टता तेन निवारिता। स्मृतिभावनिरूपणावसरे संस्कारजन्यमेव ज्ञानं स्मृतिः, न तु सदृशानुभवजन्यं ज्ञानमिति तेन स्पष्टतया निरूपितम्। बहुत्र मुनिवचने समादरं प्रदर्श्यापि पण्डितराजः अस्मिन् विषये तदभिप्रायं नाङ्गीकरोति। "------सा च स्वास्थ्य-रात्रि-जघन्य-भाग-निद्रोच्छेद-समानदर्शनोदाहरण-चिन्ता-अभ्यासादिभिर्विभावैः समुत्पद्यते" [5] इति स्मृतिविभावान् प्रतिपादयन् सदृशज्ञानजन्यमपि ज्ञानं स्मृतिमेव मन्यते भरतः। किन्तु सादृश्योत्थापितस्मृतेः व्यङ्ग्यत्वे व्यङ्ग्यस्मरणालङ्कारमङ्गीकुर्वता जगन्नाथेन "सादृश्यमूलस्यैव स्मरणस्य अलङ्कारत्वम्, अन्यस्य तु व्यञ्जितस्य भावत्वमिति सिद्धान्तात्" इत्युक्त्वा स्मृतिध्वनौ तस्याः सदृशानुभवजन्यत्वं निराकृतवान्।
3. स्मृतिध्वनेरुदाहरणावसरे तस्याः ध्वनित्वं कैश्चित् शङ्कितम्। द्वित्रैः प्रमाणैः तैः तस्याः वाच्यत्वमेव प्रस्तुतम्। किन्तु जगन्नाथेन सप्रमाणं तन्निरस्य स्मृतेर्वाच्यत्वं साधितम्। अपि च स्मृतिध्वनेः प्रत्युदाहरणमपि दत्त्वा पुनरपि स्पष्टीकरणं विहितम्।
4. भावलक्षणोदाहरणनिरूपणावसरे प्रसङ्गवशात् केषाञ्चिद्भावानां, केषाञ्चिद्भावानां-रसानाञ्च पारस्परिकभेदं प्रस्तुतवान्। शङ्का-चिन्तयोः, चिन्ता-औत्सुक्ययोः, व्याध्युन्मादयोः, श्रमालस्ययोः इत्यादि भावानां पारस्परिकं भेदः, तथैव गर्व-वीररसयोः, मतिशान्तयोः, उग्रता-क्रोधयोः इत्यादिना भाव-रसयोः पारस्परिकभेदः प्रदर्शितः।
5. यद्यपि लोके मरणशब्दस्यार्थः चैतन्येन वियुक्तता इत्येव भवति, तथापि मरणं भावेषु परिगणितम्। चैतन्यवियोगे कथं चित्तवृत्तिः प्रवर्तत इति शङ्का सहजतया जायते। अत एव तदंशं जगन्नाथः, "न चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुम्। चित्तवृत्त्यात्मकेषु भावेषु तस्या अप्रसक्तेः" [6] इति स्पष्टीकृतवान्।
6. भावानां पदव्यङ्ग्यत्वाङ्गीकारोऽपरः कश्चन विशेषः। भावानां वाक्यप्रकाश्यत्वमेव सामान्यतः सर्वैरप्यङ्गीक्रियते। "भावादीनां पदप्रकाश्यत्वेऽधिकं न वैचित्र्यमिति न तदुदाह्रियते" [7] इति काव्यप्रकाशकारेण भावानां पदध्वनित्वं यदुपेक्षितम्, तदेव भावानां पदध्वनित्वं जगन्नाथेन पुरस्कृतम्। भावेष्वपि कस्यचित्पदस्य कुर्वद्रूपतया अर्थादर्थविशेषाभिव्यञ्जनक्षमत्वेन भावध्वनेः पदप्रकाश्यत्वं सम्भवत्येव इति तदभिप्रायः। एतत्तु तेन, स्मृतिभावनिरूपणावसरे 'तन्मञ्जु मन्दहसितम्---' इत्यादौ पद्ये 'तत्', 'तानि' इत्यादिपदैः स्मरणभावस्य ध्वनित्वनिरूपणेन, मरणाख्यभावस्य निरूपणावसरे 'अधुना खलु हन्त! सा कृशाङ्गी गिरमङ्गीकुरुते न भाषिताऽपि' इत्यादौ हन्तपदेन मरणभावस्फूर्तिनिरूपणेन च स्पष्टीकृतम्। अनन्तरञ्च "एतेन भावानां पदव्यङ्ग्यत्वेऽधिकं वैचित्र्यं नास्तीति परास्तम्" इत्युक्त्वा स्वाभिप्रायः निरूपितः।
7. पण्डितराजः ध्वनिरूपेण गुणीभूतव्यङ्ग्यरूपेण चर्वणायोग्यमेव भावं भावपदार्थतया सम्भावयति। न तु मम्मटाचार्यवत् अस्फुटं कान्ताविषयरत्याख्यम् अनास्वाद्यमपि भावं भावपदेन गृह्णाति। अनेन "कान्ताविषया तु व्यक्ता शृङ्गारः" इति कथयन् मम्मटाचार्यः अपरिपुष्टायाः कान्ताविषयकरतेः भावत्वं

यत्प्रतिपादितवान् तन्नाभिपेतं जगन्नाथस्य। पृथक्सामग्रीवेद्यत्व एव अङ्गभूतस्य भावस्य गुणीभूतव्यङ्ग्यत्वमिति पण्डितराजसिद्धान्तदर्शनेन एतत् स्पष्टं भवति।

8. चित्तवृत्तीनामानन्त्यात्, भावानाञ्च चित्तवृत्तिरूपत्वात् भावानां सङ्ख्याया विषये जायमानां महतीमव्यवस्थां परिहर्तुं जगन्नाथेन भावसङ्ख्याविषये मुनिवचनं प्रमाणत्वेन प्रतिपाद्य 'भावाः त्रयस्त्रिंश'दिति व्यवस्थां संरक्षितवान्। तदर्थं तेन देव-पुत्रादिविषया रतिः पृथगेवोक्ता। मात्सर्यादीनां किञ्चिदिव व्यत्यासः वर्तते चेदपि पृथग्गणनामकृत्वा यथायथं त्रयस्त्रिंशद्भावेष्वेवान्तर्भावितवान्। सात्त्विकभावानामपि पृथक्त्वमेवोक्तवान्।
9. भावस्वरूपनिरूपणसन्दर्भ एव भावाभिव्यक्तिप्रकाराणामपि प्रस्तुतिः कृता।
10. तत्तद्भावानां चित्तवृत्तिपरतया व्याख्यानेन सह भावाभिव्यञ्जकविभावानुभावयोः सूक्ष्मालोचनपूर्वकविवेचनमपि कृतम्।
11. भावस्य नियततया चर्वणायोग्यत्वम्, रत्यादीनां भावानां भावेष्वपरिगणनद्वारा भावस्य रसध्वनि-रसवदलङ्कारव्यावृत्तत्वम्, स्पष्टविभावानुभावव्यञ्जितत्वं च जगन्नाथेन इतरालङ्कारिका-साधारणतया निरूपितमस्ति।

भावध्वनेः एकमुदाहरणमिदानीं प्रस्तूयते-
"इष्टप्राप्त्यादिजन्मा सुखविशेषो हर्षः"। इति हर्षभावलक्षणमुक्त्वा जगन्नाथः तस्य ध्वनेः इदमुदाहरणं दत्तवान् -

अवधौ दिवसावसानकाले भवनद्वारिविलोचने दधाना।
अवलोक्य समागतं तदा मामथ रामा विकसन्मुखी बभूव ॥

ममागमनार्थं निश्चिते दिने सायं गोधूलिसमये भवनस्य द्वारं मुहुर्मुहुः पश्यन्ती सा रमणी, तत्र प्राप्तं मामवलोक्य विकसितमुखी बभूव।
अत्र प्रतिज्ञातागमनसमये प्रियागमनं विभावः। मुखस्य विकासोऽनुभावः, ताभ्यां हर्षभावो व्यज्यते।

पण्डितराजः भावस्वरूपनिरूपणावसरे भावध्वनिमेव लक्ष्यीकृत्य हर्षादिव्यभिचारिणामेव भावत्वमुक्तवान्। अत व्यभिचारिणां प्रधानीभूताभिव्यक्तिरेव भावध्वनिस्थलम्। भावः कथं व्यज्यत इत्यस्मिन् विषये विवदन्ति विद्वांसः। रसगङ्गाधरे तस्याभिव्यक्तिविषयकानि त्रीणि मतान्युल्लिखितानि जगन्नाथेन। तत्र-

## 1. स्थायिभावन्यायेन

हर्षादीनाञ्च सामाजिकगतानामेव स्थायिभावन्यायेनाभि-व्यक्तिरिति। स्थायिभावन्यायेनेत्यस्य स्थायिभावतुल्यतयेत्यर्थः। वासनारूपेण सामाजिकानां हृदये स्थितानां काव्यनाट्योपस्थापितैः अविरुद्धैश्च भावैः अनभिभूतानां स्वाभिव्यक्तिसामग्र्या अलौकिक-व्यापारेण चर्वणया यथा स्थायिभावानां स्थिरा अभिव्यक्तिः, तथैव वासनात्मकतया अवस्थितानां प्राधान्यमुपलब्धवतां हर्षादीनामपि व्यञ्जकविभावादिचर्वणयाऽभिव्यक्तिरिति तात्पर्यम्।

## 2. रसन्यायेन

सामाजिकानां हृदये स्वभावतो विद्यमानोऽपि पिहितो, विभावाद्यभिव्यञ्जकसामग्र्या सत्त्वोद्रेकेण पिधानस्य निवर्तने स्थायीभावोपहितो भग्नावरणश्चिदानन्द एव यथा रसत्वेनाभिव्यज्यते, अर्थात् रत्यादयो भावाः चित्सम्पर्केण रसत्वं यथा उपयान्ति, तथैव विभावाद्यभिव्यक्तिसामग्र्या सत्त्वोद्रेकेण भग्नावरणचिद्विशिष्टा हर्षादयो भावा अपि सामाजिकहृदयेऽभिव्यज्यन्त, अर्थाच्चित्सम्पर्केण आस्वाद्यत्वमुपयान्तीति तदर्थः।
वेदान्तदर्शनाधारेण प्रवृत्तस्य मतस्यास्य आशयः- हर्षाद्यवच्छिन्नम् आनन्दांशे भग्नावरणं चैतन्यमेव भावः, हर्षाद्यवच्छिन्न-चैतन्यस्य आनन्दांशे आवरणभङ्ग एव भावाभिव्यक्तिरिति।

## 3. व्यङ्ग्यान्तरन्यायेन

व्यङ्ग्यान्तरं नाम रसभिन्नं वस्तुरूपमलङ्काररूपं च। वाचकशब्दात् वाच्योपस्थितावपि वक्तृबोद्धव्यादिवैशिष्ट्ये सत्यनुरणनन्यायेन यथा वस्त्वलङ्काररूपो व्यङ्ग्योऽर्थः श्रोतॄणां हृदयेऽभिव्यज्यते, तथैव विभावादिवाचकतत्तच्छब्दप्रत्ययानन्तरम् अनुरणनन्यायेन (संलक्ष्य-क्रमतया) हर्षादयो भावा अपि श्रोतॄणां हृदयेऽ-भिव्यज्यन्ते।
'रसाभिव्यक्तिर्यथा विभावानुभावव्यभिचारिसंयोगाद्भवति तथैव भावाभिव्यक्तेरपि विभावानुभाव-व्यभिचारिणावेव व्यञ्जका भवन्ति वा? तथा अङ्गीकृते सति (एकस्मिन् व्यभिचारिणि व्यज्यमाने व्यभिचार्यन्तरस्य व्यञ्जकत्वे च) व्यञ्जकस्यैव व्यभिचारिणः प्राधान्यापत्तिः' इति पूर्वपक्षः। किन्तु जगन्नाथः एतन्निराकरोति। यतः प्रकरणादीनां तात्पर्यनियामकत्वेन व्यभिचार्यन्तरस्य व्यञ्जकतया अभ्युपगमेऽपि न प्राधान्यापत्तिसम्भवः। अतः व्यभिचार्यन्तरस्यापि व्यञ्जकत्वमभ्युपेयमेव। प्रकरणादिबलात् कस्मिंश्चिद्भावे प्रधाने सति तद्भावस्य व्यञ्जिका या सामग्री, तयैवाविनाभावेन यतो

व्यज्यमानोऽपरो भावो भवति, तस्मात् स्वल्पतया भासमानोऽपि परो व्यभिचारि-भावः प्रधानभावस्याङ्गमेव भवति, न त्वङ्गीति विभावानुभाववद् व्यभिचार्यन्तरस्य भावव्यञ्जकताङ्गीकारे न तत्प्राधान्यापत्तिः। अत एव गर्वादौ भावेऽङ्गिनि व्यभिचार्यन्तरस्यामर्षस्य, अमर्षादौ चाङ्गिनि गर्वस्याङ्गत्वं न विरुद्धम्।

'ननु एकस्मिन् भावेऽङ्गिनि परस्य भावस्याङ्गत्वे कथं तत्र भावध्वनिरङ्गीकर्तुं शक्यते, तत्र गुणीभूतस्यैव अङ्गीकृतत्वात्' इत्युक्ते न। यत्र प्रधानभावव्यञ्जिकाया विभावानुभावरूपसामग्र्या भिन्नया सामग्र्या भावान्तरमभिव्यज्यते, तत्रैव तस्य भावान्तरस्य गुणीभूत-व्यङ्ग्यव्यवहारकारणत्वम्, न त्वङ्गत्वेनैव। प्रकृते तु उभयोरेकैव सामग्री व्यञ्जिकेति न गुणीभूतत्वसम्भवः। एवमभिन्नसामग्रीव्यङ्ग्यत्वादेव नित्यसम्बद्धयोर्भावयोः गुणप्रधानभावो नास्ति। यदि तत्रापि गुणप्रधानभावोऽङ्गीक्रियते तर्हि गर्वादिभावध्वनावपि अमर्षादिभावानाम् अभिन्नसामग्रीव्यङ्ग्यानां बलात्, गुणीभूतव्यपदेशे सर्वत्र प्रवृत्ते, भावध्वनिव्यपदेश्यस्य सर्वथापि लोप एव स्यात्।

रसध्वनौ व्यञ्जकान्यतमः विभाव आलम्बनोद्दीपनरूपः, भावध्वनौ तु निमित्तकारणसामान्य इति भेदः।

उत्तमोत्तमकाव्यस्योदाहरणे 'शयिता सविध' इत्यादौ श्लोके भावध्वनिमाशङ्क्य युक्तियुक्तं तन्निरस्य च भावध्वनेरुदाहरणं एवं प्रदर्शितवान्-

गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम्।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णिताऽऽसीत् ॥

अस्मिन् पद्ये नायिकायाः कुण्डलताण्डवस्य नतभ्रूलतिकस्य च दशया आवेगः विक्षोभावेशश्च परिलक्ष्यते। अतः संवलितामर्ष एवात्र चर्वणाविषयः-'असमीक्ष्यकारिन् ! अनवसरे केयं चेष्टा क्रियमाणा वर्तते भवता ?' इति। घूर्णितेति शब्दादपि नायिकाया नायकविषयकामर्षभाव एव व्यज्यते। अत उत्तमोत्तमकाव्यस्यैतदुदाहरणं भवति भावध्वनिद्वारा।

जगन्नाथेन भावपदेन भावशान्ति-भावोदय-भावशबलता अपि स्वीकृताः। अत एतेषां ध्वनिरपि भावध्वनिरेव-"य एते भावशान्त्युदय-सन्धि-शबलताध्वनय उदाहृतास्तेऽपि भावध्वनय एव" इत्युक्तं तेन।

एवं भावध्वनिविषये जगन्नाथः स्वविशिष्टतां प्रदर्शितवान्।

## संदर्भ

1. नाट्यशास्त्रम् -७ अध्यायः (भावाध्यायः)
2. रसगङ्गाधरः-प्रथमाननम्
3. सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते-काव्यप्रकाश-द्वितीयोल्लासः
4. काव्यप्रकाशः-चतुर्थोल्लासः
5. नाट्यशास्त्रम्-७ अध्यायः
6. रसगङ्गाधरः-प्रथमाननम्, भावनिरूपणावसरे।
7. काव्यप्रकाशः-चतुर्थोल्लासः